National Journal of Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(27): 101-103
© 2019 NJHSR
www.sanskritarticle.com

**Anjali Kabat**
Research scholar,Dept. of Sahitya,
R.S.Vidyapeetha, Tirupati

**Correspondence:**
**Anjali Kabat**
Research scholar,Dept. of Sahitya,
R.S.Vidyapeetha, Tirupati

# भीमप्रबन्धमहाकाव्ये रसविमर्शः

**Anjali Kabat**

**DOI:** https://doi.org/10.5281/zenodo.19789625

काव्ये समग्रप्रबन्धे यो रसः मुख्यो भवति स एव प्रबन्धव्यङ्ग्यः भवति इतरे रसाः यद्यपि अङ्गभूताः तत्र तत्र विस्तरेण वर्णिताः ते सर्वेऽपि प्रधानरसस्याङ्गभूता एव भवन्ति । आनन्दवर्धनः एवमेव मुख्यरसनिर्णये करणीयमिति सिद्धान्तितवान् यथा श्रीमद्रामायणे युद्धकाण्डान्तभागे विस्तरेणवीररसः एव परिपुष्टः । किन्तु काव्यान्ते सीतापरित्यागः सीतारामयोः शास्वतिकश्च वियोगः वर्णितः इति करूणस्य प्रबन्धव्यङ्ग्यत्वं अङ्गीकृतवान् । महाभारते काव्यच्छायान्वयिनी सर्वत्र स्त्रीपर्वसमास्यन्तभागे युद्धवीरो वर्णितः । तथापि शान्तः मुख्यरसः इति सिद्धान्तितवान् । पट्टाभिषिक्तोऽपि धर्मराजः शान्तिपर्वणि धर्मान् श्रुत्वा अश्वमेघेन इष्ट्वापि कृष्णावतारसमाद अनन्तरं भोगेषु विमुखः महाप्रस्थानमङ्गीकृतवान् । अतः मुख्यो रसः शान्तः इत्यपि आनन्दवर्धनः सिद्धान्तं कृतवान्।

**यदा यदा विपर्येति लोकतन्त्रमसारवत् ।**
**तदा तदा विरागोग जायते नात्र संशयः ।।**
(म.भा.शा.प.मो.ध.प.१६८/४)

इति महाभारतस्यमेव श्लोकं तत्र प्रमाणतया उदाहृतवान् च ।

**भीमप्रबन्धमहाकाव्ये वीररसः –**

रस पदेन काव्ये सर्वत्र तदुपादिभूतः स्थायिभावः एव गृह्यते **'परपराक्रमदानादिजन्म औन्नत्याय उत्साहः'** स च वीरस्य स्थायिभावो भवति । वीरः चतुर्था यथा – १. युद्धवीरः, २. दयावीरः, ३. दानवीरः, ४. धर्मवीरः च एते चत्वारो भेदाः अपि वीररसस्य भीमप्रबन्धमहाकाव्ये परिपुष्टाः । तत्र यथा –

**युद्धवीरः –**

भीमसिंह पूर्वजः जश्वन्तसिंहः दिल्लीश्वरस्य अपि स्वभुजबलेन सहायको बभूव । यदा षाजहानस्य पुत्रः औरङ्गजेबः पितरं सिंहासनात् च्यावयितुं यत्नं कृतवान् तदैव षाजहानः स्वपुत्र दमने समर्थं जश्वन्तसिंह एव नियुक्तवान् इत्यनेनैव तस्य पराक्रमः युद्धवीरत्वं च प्रतीयते । राज्ञः विश्वासं स्वस्मिन् आरोपितं सार्थकं कुर्वन् जश्वन्तोपि औरङ्गजेबं दमित्वा प्रीतात् चक्रवर्तिनः वावन्तिपुरं बहुमानं लेभे । अपि च जश्वन्तः एव काबूल दशे प्रविष्टां पठान् सेनां रूरोध।

**यश्चोग्रवीर्योजसवन्तसिंहो यः साहिजानस्य निदेशतो वैर ।**
**चकार वावन्ति पुरे तनुजा द्युद्धं महच्चौरंगजेबसंज्ञात् ।।**
**पठाणकानां पृतना महोग्रा या वै परं काबलकं प्रविष्य ।**
**म्लेच्छास्तथा काबलकं यदा वै रुद्ध्वा चतुर्दिक्षु बलेन युक्ताः ।।**
( भी.प्र.१/२६,२७)

अपि च भीमसिंहपूर्वपजाः महाप्रभाव पराक्रमसम्न्नाः इति प्रथमसर्गान्ते वर्णितम् ।यथा –

**पदातयश्चैव पदातिसंघान् ये सादिनो वै तुरगाऽधिरुढान् ।**
**संप्राहरन् शौर्यगुणाश्रयेण ये क्षात्रवर्याः मरुसंभवाश्च ।।**(भी.प्र.१/६३)

**दानवीरः, धर्मविरश्च –**

भीमसिंहवंशपूर्वजाः सर्वे दातारः वदान्याः आसन् इति काव्ये सर्वत्रवर्णितम् । द्वितीयसर्गे पृथ्वीराजः गोविन्ददासाय तुलाभारं दित्सुः अपि तेनैव वारितः तत् धनं नानादेशा आगतेभ्यः पण्डितेभ्यः ददौ । अयमेव सन्दर्भः राज्ञः विषये दानवीरः गोविन्ददासविषये अप्रतिग्रहत्वात् धर्मवीरश्च भवति ।

त्रयोदशसर्गे भीमसिंहस्य वदान्यता चत्वारिंशत् श्लोकैः वर्णितः। अकिञ्चनोऽहमिति हरिवंशेन विज्ञापितः भीमसिंहः तस्मै भूदानपूर्वकं प्रभूतंधनं ददौ।

**न चैव क्षेत्राणि न चैव कूपो न चैव ग्रामो भम भूतपूर्वः।**
**यदा महाराजकृपां विधत्ते तदैव मे सन्तति तृप्तिमेति।।**

(भी.प्र.१३/३)

**दयावीरः –**

भीमसिंहः अधनेषु दयायुक्तः तेषां कामान् पूरयामास इति त्रयोदशसर्गे वर्णितम् ।

**ये साधवः स्वल्पगुणं परेषां सविस्तृतं कृत्वा हर्षयन्ति।**
**ते वाङ्मनः काय कृतोपकाराः परक्रियां चैवं न निदयन्ति।।**

(भी.प्र.१३/१७)

अपि च जश्वन्तसिंहेन कूर्मनराधिपस्य पुनः प्रतिष्ठापनमपि दयावीरस्यैव उदाहरणम्।

**भीमप्रबन्धमहाकाव्ये श्रृङ्गाररसः –**

नायिकनायकयोः श्रृङ्गारः काव्ये साक्षात् न कुत्रित् वर्णितः, विवाहवर्णनादारश्य बहवः श्लोकः पुनरुक्ताः दृश्यन्ते। वारस्त्रीणां वर्णने वनविहारे च श्रृङ्गारस्य वर्णनं दृश्यते।

**रम्भा घृताची च तिलोत्तमा च या वै सुकशीत्यथमेलका च।**
**या भञ्जुघोषेत्यथ चोर्वशी च प्रोक्ताः बुधैः स्वर्गणिकोत्तमाश्च।।**
**आपीनवृत्तोरु पयोधराश्च कृशोदराश्चञ्चुललोचनाश्च।**
**मदोद्धताः वै नवयौवनेन प्रोक्ताः बुधैः स्वर्गणिकोत्तमान्याः।।**
**वारांगनानां कलगीतकेन क्षामोदराणां चललोचनानाम्।**
**विचित्रवेषाभरणान्वितानां सर्वे जना संमुमुहुस्तदानीम्।।**

(भी.प्र.६/५-७)

**भीमप्रबन्धमहाकाव्ये भयानकरसः –**

भयानकरसस्य भयं स्थायिभावः। **'व्याघ्रदर्शनादिजन्मा परमानर्थविषयको वैक्लब्याख्यः स भयम्'** ।(र.ग – प्र.आ)

औरङ्गजेबात् शङ्कितः षाजहानः जश्वन्तसिंह औरङ्गजेब जये नियुक्तवान् पुत्रात् अनिष्ट शङ्क एव चक्रवर्तिनि भयकारणम् न चात्र वीरभयानकयोः अन्योन्य विरोधः इति शङ्क्यः। रसविरोधः तावत् द्विविधः- १.स्थितिविरोध २.ज्ञानविरोधश्च। आद्यः तदधिकरण वृत्तिता रुपः। तत्राधिकरणान्तरे विरोधिनः स्थापने विरोधो निवर्तते ।

अत्र भयोत्साहयोः विरुद्धत्वेपि षाजहाने भयं जश्वन्तसिंह उत्साहश्च निरुपितः इति भिन्नाधिकरणाश्रितत्वम्। अपि च भोगशैल वर्णने महतां नागानां वर्णनं भयकारणं भवत्येव। माण्डोवर, पञ्चकुण्डवर्णने सर्पाणां वर्णनं भयकारणमेव सर्पदर्शनमात्रेण मनुष्य सामान्ये भयोत्पत्तिः भवत्येव। विशेषतः ते नागाः जनानां क्षयं च कुरु इति श्रवणेन भयमुद्दीपितं भवति। तेनैव भयेन देवाः पुत्रान् सर्पान् नियन्तुं भोगशैलं आदिदिषुः। एतोषां सर्पाणां वर्णनं दशमसर्गे पञ्चाभिः श्लोकैः कृतम्।

**केचिच्च गव्युति वपुः प्रमाणाः केचिच्च नल्वेन समानदेहाः ।**
**केचित्तदर्द्धार्द्धिवपुर्द्धराश्च महाविषाः क्रूरतरस्वभावाः ।।**
**ततो जगद्विप्लवमीक्ष्य वेधा पुत्रं प्रयच्छेति दिदेश शैलम् ।**
**ततस्तु पित्रोदित भोगशैलः देवैः स्तुतो नागबिलं विवेश ।।**

(भी.म.१०/४,६)

**भीमप्रबन्धमहाकाव्ये अद्भुतरसः –**

अद्भुतरसस्य विस्मयः स्थायिभावः 'अलौकिक वस्तुदर्शनादि जन्मा आश्चर्याख्यः विस्मयः' । पूर्वोक्त भयानक रसोदाहरणे गव्यूति प्रमाण सर्पदर्शनेन नल्वप्रमाण सर्पदर्शने विस्मयो भवत्येव । गव्यूतिः द्विशतं हस्तानि नल्वः चतुश्शत हस्त प्रमाणम् ।किन्तु तत्र विस्मयः भयाङ्गभूतः तत्रैव वैद्यनाथ क्षेत्रे भोगशैलदर्शनेन वृक्षविशेषाणां च दर्शनेन महान् विस्मयः भवत्येव। तदैव माण्डोदर देवी वरक्षेत्रे कपीनां विहारोपि विस्मयजनकः । उदाहरणम् यथा –

**नानाभिधाभिः सुरदीर्घिकाभिः कूपैस्तथाऽऽरामयुतैर्मद्रद्भिः ।**
**नरैस्तथा वै पुरसन्दरीभिः कुण्डैस्तथान्यैः जलयन्त्रयुक्तौः ।।**
**तत्रापि चोद्यानवरं सुरम्यं प्रकारकक्षापरिशोभमानम् ।**
**हर्म्यैरितस्तत्र च राजनूतैः सौधान्तरावेशितपल्लवैश्च ।।**

(भी.प्र.९/२४,२५)

**भीमप्रबन्धमहाकाव्ये शान्तरसः –**

शान्तस्य शमः स्थायिभावः 'नित्यानित्य वस्तुविरागजन्मा विषयविरागाख्यः निर्वेदः' गृहकलहादिजः तु व्यभिचारी।
महर्षयः संसार भयात् उद्वेजिताः मण्डोवरकुण्डपञ्चके महारण्यं प्रविश्य नानावृक्ष संयुते प्रशान्ते अरण्ये तपश्चरन्तीति कविः वर्णितवान् । तेषां वर्णनं शान्तस्यैव उदाहरणम्।

**आम्रातकोदुंबरपिप्पलैश्च खर्जुरचिंचादिवटादिकैश्च।**
**तस्यास्तटौ द्वौ परिशोभमानौ जम्बादिभिः वृक्षवरैस्तथाऽन्यैः।।**
**ततः परं पश्चिमतोश्रमाश्च वर्णाश्रमाचारवतां सताञ्च।**
**तत्र स्थितास्तत्परमं स्वरुपं प्रमार्गमाणाः पदमापुरन्त्यम्।।**
**क्वचित्व मुण्डाः जटिलाः क्वचिच्च स्वेनैव मार्गेण तपाश्चरन्ति।**
**ततः परं वै यवनाश्रमाश्च तदाश्रमस्थाः परमं प्रजग्मुः।।**
**तदग्रतो पूर्वनराधिपानां कालेन लोकान्तरमागतानाम्।**
**तेषां वधूनां सुरसद्मतुल्याः य आश्रमाः पुण्यगता व्यरोचन्।।**

(भी.प्र.१०/८-११)

**भीमप्रबन्धमहाकाव्ये भक्तिरसः-**

भजनं - भक्तिः भक्तिशब्दः सेवामात्रार्थकोपि लोकव्यवहारे भगवद्विषयक चिन्तायां रुढः । राजभक्तिः, देसभक्तिः इत्यादि व्यवहारस्तु सेवार्थकः औपचारिको वा ।

**द्रुतस्य भगवद्धर्माद्धारावाहिकतां गता ।**
**सर्वेशे मनसो वृत्तिर्भक्तिरित्यभिधीयते ।।**(भ.भ.र.१/४)

कविः प्रथमसर्गे मङ्गलाचरणार्थं दैवस्तुतिं कृत्वा भक्तिरसं पुपोष। एकस्मिन् देवे एकाग्रबुद्धिरूपा भक्तिः यद्यपि उचिता तथापि सम्प्रदायमनुसृत्य बहून् देवान् कविः सस्मार । सर्वान् देवान् एकस्मिन् श्लोके स्तुत्वापि पुनः पृथगपि कीर्तितवान्। प्रथमसर्गे चत्वारः श्लोकाः भक्तिरसात्मकाः वर्तन्ते।

**गणेश्वरं चैव रमेश्वरं च सरस्वतीं चैवमुमेश्वरं च।**
**नत्वा प्रवक्ष्ये हि नराधिपानमजीतसिंहस्य कुलोद्भवानाम्।।**
**वाणी प्रसन्ने त्यवदञ्च सिद्धिं वृत्तेन गन्तास्युपजातिकेन।**
**तेनैव वृत्तेन करोमि काव्यं सश्लाघनीयं कविपुंगवैश्च।।**
**गणपति हिमशैल सुतात्मजं प्रणतपाल सुरेश्वरसेवितम्।**
**भजत विघ्नहरं प्रणमार्तिहं प्रथममात्ममनोरथसिद्धये।।**
**सृजत्यवत्यत्ति च लोकभावो लीलावतारांश्च बिभर्तिविष्णुः।**
**रुपं गृहित्वा स हि पौरुषं च शेतेऽर्णवाम्भस्यथ योगनिद्रः।।**

(भी.म.१/१,३,५,६)

वाणी प्रसन्ना इति श्लोके वाणी स्मरणं केवलतया यद्यपि नोक्तं तथापि सरस्वत्याः प्रसन्नता वर्णनेन कविगतभक्तिः अभिव्यक्ता ।

अपि च भीमसिंहवंशजानां पूर्वपुरुषाणां श्रीमन्नारायणे भक्तिः बहुषु स्थलेषु कविः वर्णितवान् । अपि च काव्ये तत्र तत्र देवता प्रार्थनमुखेन राज्ञे आशिषः प्रयुक्तवान् । ते सर्वे श्लोकाः भक्तिरसस्यैव उदाहरणं भवितुमर्हन्ति।

**दानाम्बुरेखोपरि संस्थिताञ्च भृंगावलिर्यस्य विभाति कण्ठे।**
**तत्वात्मिका जीवनिदानभूता रुद्राक्षमालेव विनायकोऽव्यात्।।**

(भी.प्र.३/१)

माण्डोदरी देवी वर्णनेपि देव्याः महिमानवर्णनं शिवकोशवयोः कीर्तनं च भक्तेः उदाहरणं भवत्येव। नवमसर्गे भक्तिरसोदाहरण लक्ष्यभूताः श्लोकाः अपि बहवो विद्यन्ते।

**या वै तदग्रे महिषस्य हन्त्री या वै तथा शुंभनिशुंभहन्त्री।**
**या शक्तिरेकाऽपि ह्यनेकरुपा भक्त्याऽर्चिता सैव शुभं करोति।।**

(भी.म.९/३९)

पञ्चकुण्डवैद्यनाथवर्णनमपि दशमसर्गे नवमसर्गे च भक्तिरसोदाहरणं भवितुमर्हन्ति।

**तद्भोगशैले च महेश्वरोऽपि देवैः समस्तैः कृपया ह्युवास।**
**तीर्थानि सर्वाणि सरिद्वरायाः नागाश्च देव्यो वसतिं प्रचक्रुः।।**
**स वै महाभैरव एक एव स्वमायया चैव ह्यनेकरुपः।**
**अत्राऽऽस्थितो भोगधराधरे च हिताय रुद्रस्य च कृष्णगौरः।।**
**यौ कृष्णगौरावपि विष्णुरुपौ यो रुद्ररुपश्च।**
**स्तुत्याऽनया ते च प्रसन्नरुपाः ददतीह पुत्रान् पौत्रान् धनं च।।**

(भी.म.१०/७ , ९/४९ ,५०)

अपि च सामाजिकेषु विषयेषु धर्मावलम्बन विभागे ये श्लोकाः उदाहृताः ते भक्तिरसस्यापि उदाहरणं भवितुमर्हन्ति ।

काव्यस्य वीररसप्रधानत्वात् इतरेषां रसानां वर्णनावकाशः अल्पतरः एव । अपि च काव्यमपि संपूर्ण स्वरुपात्मकं नोपलब्धम् यदि विंशतिसर्गाः अपुनरुक्तैः श्लोकैः सर्गैः वा भवेयुः तदा रसोदाहरणानि भूयांसि भवन्त्येव।

**सन्दर्भग्रन्थसूची –**


**१.महाभारतम्-** रामनारायणदत्तशास्त्रीपाण्डेय,गोरखपुर गीताप्रेस।

**२.भीमप्रबन्धमहाकाव्यम्-** डॉ.महेन्द्र सिंह नगर,महाराजा मानसिंह पुस्तक प्रकाश शोध केन्द्रः मेहरानगढ म्यूजियम ट्रस्ट, दुर्ग जोधपुर, २०१९ ।

**३.रसगङ्गाधरः –** पं.श्रीबदरीनाथ झा,पं.मदनमहोन झा, चौखम्बा विद्याभवन, वाराणसी, १९९० ।

**४.भगवद्भक्तिरसायनम् –** श्री जनार्दनशास्त्री पाण्डेय, चौखम्बा विद्याभवन, वाराणसी, २००८ ।